सम्भाषणसन्देशः

एप्रिल् - १९९६

विनोदसञ्चिका

संस्कृतपत्रिकाक्षेत्रे अतिविशिष्टा विनूतना विनोदसञ्चिका एषा ।

आकर्षकं मुखचित्रम्, विनोदपूर्णानि लेखनानि, अनेकानि विनोदचित्राणि - इत्यादीनि ।

विनोदलेखनानि

पादांशुकप्रकरणम्

- १ -

नारायणः - अद्य आपणतः एकं पादांशुकम् आनीतवान् । पश्यामि कथम् अस्ति इति । (दृष्ट्वा) बहु समीचीनम् अस्ति । परन्तु .... पादयोः दीर्घता अधिका जाता किल ! पश्यामि ... (मापनपट्टिकां गृहीत्वा) यदि एतावन्तं भागं कर्तयामि तर्हि सम्यक् भवति । किन्तु कर्तयामि चेत् पुनः किञ्चित् सीवनं करणीयं भवति । अतः मातरम् एव वदामि । अम्ब..... अम्ब ..... ।

माता - (प्रविश्य) किं भोः ...?

नारायणः - पश्यतु, नूतनं पादांशुकम् आनीतवान् अस्मि । परन्तु एतावत् दीर्घं भवति । भवती अत्र अङ्गुलचतुष्टयं यावत् - पश्यतु, एतावत् ...कर्तयित्वा पुनः सीवनं कृत्वा ददाति वा ..?

विनोदकणिकाः

हसाम किञ्चित्

अद्य पाठः अस्ति इत्यस्य भविष्यत्कालरूपं किम् ?''

''श्वः विरामः भविष्यति इति ।''

''कथम् एतत् ?''

''यतः श्वः भानुवासरः ।''

* * *

पुनः पुनः दोषं करोति खलु भवान् ? भवता एवं न करणीयम् ।''

''अस्तु तर्हि । इतःपरं न करिष्यामि 'दोषम्', अपि तु करिष्यामि दोषान् ।''

उत्तरायणम्

? लोके सर्वे सत्यम् एव यथा वदेयुः तथा कर्तुं किं करणीयम् ?

■ उपायः सुलभः । असत्यस्य एव 'सत्यम्' इति नाम करणीयम् ।

भीमेन्द्र ब्रह्मचारी, सुरपुरम्

? बहुविधक्रियाशीलः अपि पुरुषः विवाहानन्तरं किमर्थं निष्क्रियः भवति ?

■ (भारम्) 'ऊढवान्' जनः भाराधिक्यवशात् किमपि कर्तुं न शक्नोति खलु !

नैनं छिन्दन्ति शस्त्राणि

तैलपानां विषये भगवद्गीतायाम् उल्लेखः अस्ति इति यदि अहं वदामि तर्हि भवताम् आश्चर्यं भवेत् ननु ?

विशेषलेखनानि

सङ्गणकयन्त्रे सचित्रो वेदः

''अत्याधुनिकस्य सङ्गणक-तन्त्रज्ञानस्य साहाय्येन क्रियमाणा अतिप्राचीनस्य वैदिकवाङ्मयस्य बहुमाध्यमप्रस्तुतिः कस्य वा मनः न आकर्षेत् ?''

विश्वकप् क्रिकेट्

गतमासे प्रवृत्तायाः विश्वकप्-क्रिकेट्क्रीडायाः विषये एकं विश्लेषणम्, एकं चिन्तनं च ।

गत फरवरी १४ दिनाङ्कतः १७ दिनाङ्कपर्यन्तः मासात्मकः कालः जगतः क्रिकेट्प्रेमिणां पर्वकालः । यतः षष्ठविश्वकप्-क्रिकेट्क्रीडाः तस्मिन् काले प्रवृत्ताः । चतुर्षु वर्षेषु एकदा प्रचलन्तीषु एतासु क्रीडासु यस्य देशस्य क्रीडालवः जयं प्राप्नुवन्ति सः देशः क्रिकेट्-क्रीडायाः अनभिषिक्तः चक्रवर्ती इत्येव परिगण्यते । अतः एव विश्वविजयित्वं प्राप्तुं सर्वैः अपि तीव्रः प्रयत्नः क्रियते ।

बालमोदिनी

पञ्चमहाकाव्यानां व्याख्यानकर्तुः मल्लिनाथस्य जीवनविषयिणी लोककथा - पलाशकुसुमं यथा

आन्ध्रप्रदेशे गोदावरी-मण्डले कस्मिंश्चित् नगरे वेदज्ञः सर्वशास्त्रकोविदः कश्चित् ब्राह्मणः वसति स्म । तस्य एकः एव पुत्रः आसीत् । तस्य नाम पेद्दिभट्टः इति । सः अत्यन्तं सुन्दरः गुणवान् सुशीलः सदाचारः च आसीत् । किन्तु सः विद्याहीनः आसीत् । बाल्यादेव तस्य अध्ययने अभिरुचिः न आसीत् । क्रीडन् एव बाल्यं सर्वं यापितवान् सः ।

रसवार्ताः

विघ्नाधीशप्रमुखाः जीविकार्थे....

आष्ट्रेलिया-टङ्कशाला इदानीं सुवर्णनाणकानाम् उपरि भारतीय-देवानां चित्राणां टङ्कने उद्युक्ता अस्ति ।

उपहासः कारागारवासाय !

स्वेन पीडिता सा तरुणी जनपदाधिकारिणी एव इति ज्ञातवतां युवकानां गतिः का स्यात् ?

पृथगस्तित्वम्, अभिन्नाङ्गत्वम्

अभिन्नात् मातुः उदरात् युगपत् एव उत्पन्नौ यमलौ इति उच्येते । अधः चित्रे दृश्यमानयोः एतत् वैशिष्ट्यं यत् यमलयोः एतयोः अभिन्नदेहत्वम् । नाभिपर्यन्तं पृथगस्तित्वम् एतयोः ।

कथा

क्षमया धरित्री

स्त्रीणां सहनशीलता यादृशी भवति तादृशी न भवति पुरुषाणाम् । कदाचित् पतिपुत्रादीनां सन्तोषार्थं स्वसुखम् अपि परित्यज्यते स्त्रीभिः ।

एतदतिरिच्य

पदसम्पदः वर्धनाय ''निकषोपलः'' पदरञ्जिनी च । संस्कृतवार्ताः, विनोदचित्राणि - इत्यादयः बहवः अंशाः ।